# SANSKRIT

## प्रथम प्रश्न-पत्रम् :( नाटकं, प्राचीनकाव्यं, संस्कृतसाहित्यस्य इतिहासः )

http://questionpaperesult.com/

Scanned by CamScanner

Time Allowed : Three Hours　　　　　　Max. Marks : 100

1. निम्नलिखितस्य श्लोकस्य संदर्भसहितः अनुवादः करणीयः–

(क) नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरुणामधः,
प्रस्निग्धाः क्वचिदङ्गुदीफलभिदः सूच्यन्त एवोपलाः।
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा–
स्तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किताः।।

**अथवा**

वाचं न मिश्रयति: यद्यपि मद्वचोभिः,
कर्णं ददात्यभिमुखं मयि भाषमाणे।
कामं न तिष्ठंति मदाननसम्मुखीना,
भूयिष्ठामन्यविषया न तु दृष्टिरस्याः।।

(ख) न नमचितुमधिज्यमस्मि शक्तो,
धनुरिदमाहितसायकं मृगेषु।
सहवसतिमुपेत्य यैः प्रियायाः,
कृत इव मुग्धविलोकितोपदेशः।।

**अथवा**

अनाघ्रातं पुष्पं किसलयमलूनं कररुहै–
रनाविद्धं रत्नं मधु नवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः।

2. अधोलिखितस्य श्लोकस्य ससन्दर्भा व्याख्या करणीया–　　　　7½+7½

(क) विचिन्तयन्ती यमनन्यमानसा,
तपोधनं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोऽपि सन्
कथां प्रमत्तः प्रथमं कृतामिव।

**अथवा**

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वतीपेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।।

(ख) प्रजाः प्रजाः स्वा इव तन्त्रयित्वा
निषेवते श्रान्तमना विविक्तम्।
यूथानि संचार्य रविप्रतप्तः
शीतं दिवा स्थामनिव द्विपेन्द्रः।।

**अथवा**

एकैकमत्र दिवसे दिवसे मदीयं
नामाक्षरं गणय गच्छसि यावदन्तम्।
तावत् प्रिये मदवरोधगृहप्रवेशं

Scanned by CamScanner

नेता जनस्तव समीपमुपैष्यतीति।। 10+10

3. अभिज्ञानशाकुन्तलमधिकृत्य केषाञ्चित् पञ्च प्रश्नानां संस्कृतभाषया उत्तरं देयम्-

(क) कालिदासस्य कति नाटकानि? नामानि लिखन्तु।

(ख) शकुन्तला कस्य पुत्री आसीत्?

(ग) दुष्यन्तस्य सायकं कस्यार्थे आसीत्?

(घ) मालिनीतटे कस्य आश्रमो आसीत्?

(ङ) आश्रमवृक्षान् प्रति शकुन्तलायाः कीदृशः स्नेहः आसीत्?

(च) 'अभिज्ञानशाकुन्तलम्' नाटके विदूषकस्य किं नाम् आसीत्?

(छ) राजा दुष्यन्तः केन कारणेन नगरं न गतः?

(ज) कन्या कीदृशः अर्थः भवति?

(झ) नाटके कति अङ्काः सन्ति?

(ञ) स्यन्दनालोकभीतः कः धर्मारण्यं प्रविशति? 2+2+2+2+2

4. अधोलिखितानां छन्दसां केषाञ्चित् त्रयाणां लक्षणमुदाहरणलक्षणसङ्गतिं च विवेचनीयम्-

(क) उपजाति (ख) द्रुतविलम्बित

(ग) मालिनी (घ) शार्दूलविक्रीडित

(ङ) स्रग्धरा (च) वसन्ततिलका 5+5+5

5. 'यदिहास्ति तदन्यत्र यन्नेहास्ति न तद् क्वचित्।' सूक्तिमधिकृत्य महाभारतस्य वैशिष्ट्यं प्रतिपादयन्तु।

**अथवा**

'किरातार्जुनीयं' महाकाव्यमाधारीकृत्यः भारवेः कृतित्वविषये एकं निबन्धं लिखन्तु।

10

6. अधोलिखितेषु कयोः द्वयोः टिप्पणी लिखन्तु -

(क) दशकुमारचरितम्। (ख) उत्तररामचरितम्।

(ग) पंचतंत्रम्। (घ) मेघदूतम्। 5+5

7. केषाञ्चित् पञ्च प्रश्नानामुत्तराणि संस्कृतमाध्यमेन लिखन्तु -

(क) रामायणे कति काण्डानि सन्ति?

(ख) 'मृच्छकटिकम्' रूपकस्य कतमः प्रकारः अस्ति?

(ग) संस्कृतसाहित्ये महाकवेः भवभूतेः प्रसिद्धिः कस्मात् कारणात् अस्ति?

(घ) 'स्वप्नवासवदत्तम्' इति नाटके स्वप्नदृश्यः कस्मिन् अङ्के वर्तते।

(ङ) 'सौन्दरनन्द' महाकाव्यस्य रचयिता कोऽस्ति?

http://questionpaperesult.com/

Scanned by CamScanner